# ॥ नारायणसूक्तम् ॥

तैत्तिरीयारण्यकम्॥ - ४ प्रपाठकः - १० अनुवाकः - १३

ॐ ॥ सह नाववतु । सहनौ भुनक्तु । सहवीर्यं करवावहै । तेजस्विनावधीतमस्तु मा विद्विषावहै ।

**ॐ शान्तिः । शान्तिः । शान्तिः ॥**

ॐ ॥ सहस्रशीर्षं देवं विश्वाक्षं विश्वशम्भुवम् । विश्वं नारायणं देवमक्षरं परमं पदम् । विश्वतः परमान्नित्यं विश्वं नारायणगं हरिम् । विश्वमेवेदं पुरुष-स्तद्विश्व-मुपजीवति । पतिं विश्वस्यात्मेश्वरगं शाश्वतगं शिव-मच्युतम् । नारायणं महाज्ञेयं विश्वात्मानं परायणं । नारायणपरो ज्योतिरात्मा नारायणः परः । नारायणपरं ब्रह्म तत्त्वं नारायणः परः । नारायणपरो ध्याता ध्यानं नारायणः परः । यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ॥

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः । अनन्तमव्ययं कविगं समुद्रेऽन्तं विश्वशम्भुवम् । पद्मकोश-प्रतीकाशगं हृदयंचाप्यधोमुखम् । अधो निष्ट्या वितस्यान्ते नाभ्यामुपरि तिष्ठति । ज्वालमालाकुलं भाती विश्वस्यायतनं महत् । सन्ततगं शिलाभिस्तु लम्बत्याकोशसन्निभम् । तस्यान्ते सुषिरगं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितं । तस्य मध्ये महानग्नि-र्विश्वार्चि-र्विश्वतोमुखः । सोऽग्रभुग्विभजन्तिष्ठ-न्नाहारमजरः कविः । तिर्यगूर्ध्व-मधश्शायी रश्मयस्तस्य सन्तता । सन्तापयति स्वं देहमापाद-तलमस्तकः । तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः । नीलतो-यदमध्यस्था-द्विद्युल्लेखेव भास्वरा । नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा । तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः । स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥ ऋतगं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः । ॐ नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ॥

**ॐ शान्तिः शान्तिः शान्तिः ॥**

## || nārāyaṇasūktam ||

taittirīyāraṇyakam|| - 4 prapāṭhakaḥ - 10 anuvākaḥ - 13

oṁ || saha nāvavatu| sahanau bhunaktu| sahavīryaṁ karavāvahai| tejasvināvadhītamastu mā vidviṣāvahai ||

**oṁ śāntiḥ | śāntiḥ | śāntiḥ | ||**

oṁ|| sahasraśīrṣaṁ devaṁ viśvākṣaṁ viśvaśambhuvam| viśvaṁ nārāyaṇaṁ devamakṣaraṁ paramaṁ padam| viśvataḥ paramānnityaṁ viśvaṁ nārāyaṇagṁ harim| viśvamevedaṁ puruṣa-stadviśva-mupajīvati| patiṁ viśvasyātmeśvaragṁ śāśvatagṁ śiva-macyutam| nārāyaṇaṁ mahājñeyaṁ viśvātmānaṁ parāyaṇaṁ| nārāyaṇaparo jyotirātmā nārāyaṇaḥ paraḥ| nārāyaṇaparaṁ brahma tattvaṁ nārāyaṇaḥ paraḥ| nārāyaṇaparo dhyātā dhyānaṁ nārāyaṇaḥ paraḥ| yacca kiñcijjagatsarvaṁ dṛśyate śrūyate'pi vā ||

antarbahiśca tatsarvaṁ vyāpya nārāyaṇaḥ sthitaḥ| anantamavyayaṁ kavigṁ samudre'ntaṁ viśvaśambhuvam| padmakośa-pratīkāśagṁ hṛdayañcāpyadhomukham | adho niṣṭyā vitasyānte nābhyāmupari tiṣṭhati| jvālamālākulaṁ bhātī viśvasyāyatanaṁ mahat| santatagṁ śilābhistu lambatyākośasannibham| tasyānte suṣiragṁ sūkṣmaṁ tasmin sarvaṁ pratiṣṭhitaṁ| tasya madhye mahānagni-rviśvārci-rviśvatomukhaḥ| so'grabhugvibhajantiṣṭha-nnāhāramajaraḥ kaviḥ| tiryagūrdhva-madhaśśāyī raśmayastasya santatā| santāpayati svaṁ dehamāpāda-talamastakaḥ| tasya madhye vahniśikhā aṇīyordhvā vyavasthitaḥ| nīlato-yadamadhyasthā-dvidyullekheva bhāsvarā| nīvāraśūkavattanvī pītā bhāsvatyaṇūpamā| tasyāḥ śikhāyā madhye paramātmā vyavasthitaḥ| sa brahma sa śivaḥ sa hariḥ sendraḥ so'kṣaraḥ paramaḥ svarāṭ ||

ṛtagṁ satyaṁ paraṁ brahma puruṣaṁ kṛṣṇapiṅgalam| ūrdhvaretaṁ virūpākṣaṁ viśvarūpāya vai namo namaḥ|

oṁ nārāyaṇāya vidmahe vāsudevāya dhīmahi | tanno viṣṇuḥ pracodayāt|| **oṁ śāntiḥ śāntiḥ śāntiḥ ||**